भोगः करे षट्पदयोस्तु षट्के
भीतिर्नृणां स्याद्विशुकस्य चक्रे ॥
यस्मिन्नृचे वसेद्भानुस्तस्मात् संगणयेद्बुधः ॥”
इति समयामृतम् ॥)

जलवृश्चिकः, पुं, ( जले वृश्चिक इव । ) चिङ्गटमत्स्यः । इति त्रिकाण्डशेषः ॥

जलवेतसः, पुं, ( जलजातो वेतसः । ) वानीरवृक्षः । इति राजनिर्घण्टः ॥ (यथास्य पर्य्याया गुणाश्च ।
“निकुञ्चकः परिव्याधो नादेयो जलवेतसः ।
जलजो वेतसः शीतः कुष्ठकृद्वातकोपनः ॥”
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

जलव्यधः, पुं, ( जलं विध्यतीति । व्यध + अच् । ) कङ्कत्रोटमत्स्यः । इति त्रिकाण्डशेषः ॥

जलव्यालः, पुं, ( जलस्थितो व्यालो हिंस्रजन्तुः । ) अलगर्द्दसर्पः । इत्यमरः । १ । ८ । ५ ॥ क्रूरकर्म्मा जलजन्तुः । इति राजनिर्घण्टः ॥

जलशयः, पुं, ( जले शेते । शी + अच् । पुंसीति घो वा । ) विष्णुः । इति हेमचन्द्रः ।२।१२८॥

जलशयनः, पुं, ( जले क्षीरोदसलिले शेते इति । शी + ल्युः । ) विष्णुः । इति हलायुधः ॥

जलशायी, [न्] पुं, ( जले शेते इति । शी + णिनिः ।) विष्णुः । यथा, पुराणम् ।
“जलमध्ये वराहञ्च पावके जलशायिनम् ॥”

जलशुक्तिः, स्त्री, ( जलचरी शुक्तिः । ) शम्बूकः । इत्यमरः । १ । १० । २३ ॥ शामुक इति जलसीपी इति च भाषा ॥ तत्पर्य्यायः । वारिशुक्तिः २ क्षुद्रशुक्तिः३ क्षुद्रशुक्तिका४ शम्बूका५ नरशुक्तिः ६ पुटिका ७ तोयशुक्तिका ८ । तस्या गुणाः । कटुत्वम् । स्निग्धत्वम् । दीपनत्वम् । गुल्मशूलविषदोषनाशित्वम् । रुच्यत्वम् । पाचनत्वम् । बलदातृत्वञ्च । इति राजनिर्घण्टः॥

जलशूकं, क्ली, (जले शूकं सूक्ष्माग्रमिव ।) शैवालम् । इति हेमचन्द्रः ।४।२३३॥ (पुंलिङ्गेऽपि दृश्यते । यथा,—
“जलशूकः स्वयं गुप्ता रजन्यौ वृहतीद्वयम् ॥”
इत्युत्तरस्थानेऽष्टादशेऽध्याये वाभटेनोक्तम् ॥)

जलशूकरः, पुं, ( जले जलस्य वा शूकर इव । ) कुम्भीरः । इति हेमचन्द्रः । ४ । ४१५ ॥

जलसर्पिणी, स्त्री, ( जले सर्पति गच्छतीति । सृप + णिनि + ङीप् । ) जलौका । इति हेमचन्द्रः । ४ । २७० ॥

जलसूचिः, पुं, ( जले सूचिरिव । अभिधानात् पुंस्त्वम् । ) कङ्कत्रोटमत्स्यः । शृङ्गाटः । शिशुमारः । जलौकायां स्त्री । इति मेदिनी । चे, २० ॥ काकः । इति हेमचन्द्रः ॥

जलस्तम्भनं, क्ली, ( जलस्य स्तम्भनम् । ) मन्त्रादिद्वारा जलगतिनिवारणम् । तन्मन्त्रो यथा,—
“ओम् नमो भगवते जलं स्तम्भय स्तम्भय संसमंसके कके कचर ।
जलस्तम्भनमन्त्रोऽयं जलं स्तम्भयते शिव ! ॥”
इति गारुडे १७६ अध्यायः ॥ पुस्तकान्तरे १८६ अध्यायः ॥ ( जलस्तम्भनविद्या दुर्य्योधनेन विदितासीत् । अतएवायं द्वैपायनह्रदजलं संस्तभ्य तत्र सुष्वाप । एतत्कथा महाभारते शल्यपर्व्वणि २८ अध्याये द्रष्टव्या ॥)

जलस्था, स्त्री, ( जले जलबहुलप्रदेशे तिष्ठतीति । स्था + कः । स्त्रियां टाप् । ) गण्डदूर्व्वा । इति राजनिर्घण्टः ॥ (जलावस्थिते, त्रि । यथा, भागवते । ३ । २७ ।१२ ।
“यथा जलस्थ आभासो जलस्थेनावदृश्यते ।
स्वाभासेन तथा सूर्य्यो जलस्थेन दिवि स्थितः ॥”)

जलहं, क्ली, ( जलेन हन्यते इति । हन + बाहुलकात् डः । ) खल्पजलयन्त्रगृहम् । इति त्रिकाण्डशेषः ॥

जलहासः, पुं, ( जलानां हास इव शुक्लत्वात् । ) समुद्रफेनः । इति त्रिकाण्डशेषः ॥

जलाका, स्त्री, ( जले आकायति प्रकाशते इति । आ + कै + कः । ) जलौकाः । इति शब्दरत्नावली ॥

जलाञ्ची, स्त्री, ( जलमञ्चति व्याप्नोति कारणतयेति । अञ्च + अण् । ) जलपिप्पली । इति शब्दरत्नावली ॥

जलाखुः, पुं, ( जले आखुरिव । ) जलनकुलः । इति त्रिकाण्डशेषः ॥

जलाञ्चलं, क्ली, ( जलमञ्चति व्याप्नोतीति । अञ्च + बाहुलकात् अलच् । यद्वा, जले अञ्चलः वस्त्रप्रान्त इव । अभिधानात् क्लीवत्वम् । ) शैवालम् । स्वतो वारिनिर्गमः । इति मेदिनी । ले, १५४ ॥

जलाटनः, पुं, ( जले अटति भ्रमतीति । अट + ल्युः । ) कङ्कपक्षी । इति मेदिनी । ने, १८४ ॥ (विशेषोऽस्य कङ्कशब्दे ज्ञातव्यः ॥)

जलाटनी, स्त्री, ( जले अटति भ्रमतीति । अट + ल्युः । स्त्रियां ङीष् ।) जलौका । इति मेदिनी । ने, १८४ ॥

जलाटकः, पुं, ( जले अखते इतस्ततो भ्रमतीति । अख गतौ + ण्वुल् । पृषोदरादित्वात् ठस्य टः । ) नक्रराजः । इति हारावली ।७७॥

जलाण्डकं, क्ली, ( जले अण्डमिव कायतीति । कै + कः । ) पोताधानम् । इति शब्दरत्नावली ॥

जलात्मिका, स्त्री, ( जलमेव आत्मा यस्याः । कप् ततः टापि अत इत्वम् । ) जलौका । इति शब्दरत्नावली ॥

जलाधारः, पुं, ( जलस्य आधारः । ) जलाशयः । इत्यमरः । १ । १० । २५ ॥ ( यथा, याज्ञवल्क्ये । ३ । १४४ ।
“आकाशमेकं हि यथा घटादिषु पृथग् भवेत् ।
तथात्मैकोऽप्यनेकस्तु जलाधारेष्विवांशुमान् ॥”)

जलाधिदैवतः, पुं, ( जलस्याधिदैवतं अधिष्ठात्री देवता । ) वरुणः । इति हलायुधः ॥ ( जलं अधिदैवतं यस्य । ) पूर्व्वाषाढ़ानक्षत्रे, क्ली । इति ज्योतिषम् ॥

जलाम्बिका, स्त्री, ( जलस्य अम्बिका माता इव । क्रोड़देशे जलधारणादस्यास्तथात्वम् । ) कूपः । इति हारावली । ४१ ॥ जलाम्बिका इति क्वचित् पाठः ॥

जलायुका, स्त्री, ( जलमायुरस्याः । कप् । पृषोदरादित्वात् सलोपः । ) जलौका । इति शब्दरत्नावली ॥ ( यथा, सुश्रुते । १ । १३ ।
“अथ जलायुका वक्ष्यन्ते । जलमासामायुरिति जलायुकाः ॥” अस्या अन्यद्विवरणं जलौकःशब्दे द्रष्टव्यम् ॥ यस्मिन्नियं अवहृता तद्यथा,—
“नस्याञ्जनाभ्यञ्जनपानधूमं
तथावपीड़ं कवलग्रहञ्च ।
संशोधनञ्चोभयतः प्रयुञ्ज्या-
द्रक्तं हरेच्चापि जलायुकाभिः ॥”
इति सुश्रुते कल्पस्थानेऽष्टमेऽध्याये ॥)

जलार्द्रः, पुं, ( जलेन आर्द्रः सिक्तः । ) आर्द्रवस्त्रम् । इति हारावली । १६६ ॥ (जलसिक्ते, त्रि । यथा, मेघदूते । ४५ ।
“तत्र स्कन्दं नियतवसतिं पुष्पमेघीकृतात्मा
पुष्पासारैः स्नपयतु भवान् व्योमगङ्गाजलार्द्रैः॥”)

जलार्द्रा, स्त्री, ( जलेन आर्द्रा सिक्ता । ) क्लिन्नवस्त्रम् । इति हेमचन्द्रः । ३ । ३४३ ॥ ( आर्द्रतालवृन्तम् । यथा, वैजयन्ती ।
“धुवित्रं तालवृन्तं स्यादुत्क्षेपव्यजनञ्च तत् ।
जलेनार्द्रं जलार्द्रा स्यात्————— ॥” )

जलार्णवः, पुं, ( जलप्रचुरोऽर्णवः समुद्रो यत्र काले । ) वर्षाकालः । इति त्रिकाण्डशेषः ॥ ( जलप्रचुरोऽर्णवः । ) जलसमुद्रश्च ॥

जलालुः, पुं, ( जलजात आलुः । शाकपार्थिववत् समासः । ) पानीयालुः । इति राजनिर्घण्टः ॥

जलालुकं, क्ली, ( जलालुरिव कायति प्रकाशते इति । कै + कः । ) पद्मकन्दः । इति राजनिर्घण्टः ॥

जलालुका, स्त्री, ( जले अलति गच्छतीति । अल गतौ + बाहुलकात् उकः । ) जलौका । इति शब्दरत्नावली ॥

जलालोका, स्त्री, ( जले आलोक्यते दृश्यते इति । आ + लोक दर्शने + कर्म्मणि घञ् । ) जलौका । इत्यमरटीकायां भरतः ॥

जलावर्त्तः, पुं, ( जलस्य आवर्त्तः सम्भ्रमः । ) जलगुल्मः । अम्भसां भ्रमः । इति जटाधरः ॥

जलाशयं, क्ली, ( जले जलबहुलप्रदेशे आशेते इति । आ + शी + अच् । ) उशीरम् । इत्यमरः । २ । ४ । १६४ ॥ लामज्जकम् । इति राजनिर्घण्टः ॥ ( जलशायिनि, त्रि । यथा, महाभारते । ३ । १४३ । ५४ ।
“ततः सत्वान्युपाक्रामन् सुबहूनि महान्ति च ।
ऋक्षवानरसिंहांश्च महिषांश्च जलाशयान् ॥”)

जलाशयः, पुं, ( जलस्य आशय आधारः । ) जलाधारः । स तु पुष्करिण्यादिः । इत्यमरः । १ । १० । २६ ॥ (यथा, मनुः । ४ । १२८ ।